जासम् २, } जिजासयिषम् २, } जासम् २, } जिजसिषम् २, }
जासयित्वा २, } जिजासयिषित्वा २, } जासित्वा २, } जिजसिषित्वा २, }
जाजसम् २ ; }
जाजसित्वा. }

(597) "जसु ताडने" (X-चुरादिः-1719. सक. सेट्. उभ.)

'हिंस ताडनयोर्धात्वोः उदितोर्जासयेदिति ।' (श्लो. 189.) इति देवः।

जासकः-सिका, जिजासयिषकः-षिका, जासकः-सिका, जिजसिषकः-षिका, जाजसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि अव्यवहितपूर्वलिखितहिंसार्थकजसुधातुवत् (596) बोध्यानि ।

(598) "जागृ निद्राक्षये" (II-अदादिः-1072. अक. सेट्. पर.)

जक्षित्यादिः ।

धातोरस्यानेकाच्त्वात् 'धातोरेकाच–' (3-1-22) इति विहितो यङ् न भवति।

[1]जागरकः-रिका, [2]जागरकः-रिकाः, [3]जिजागरिषकः-षिका; —

[4]जागरिता-त्री, जागरयिता-त्री, जिजागरिषिता-त्री ;

[5]जाग्रत्[A]-ती, [6]जागरयन्-न्ती, जिजागरिषन्-न्ती ;

---

1. 'जाग्रोऽविचिण्णल्ङित्सु' (7-3-85) इति वृद्ध्यपवादो गुणः । एवं घञन्ते णमुलन्ते च गुण एव ।

2. वृद्ध्यपवादे 'जाग्रोऽवि—' (7-3-85) इति गुणे कृते, 'अत उपधायाः' (7-2-116) इति वृद्धिरपि न भवति ; गुणविधानसामर्थ्यात् । अत एव चिण्णल्प्रतिषेधः सार्थकः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।

3. 'इको झल्' (1-2-9) इति सनः कित्त्वेऽपि, 'जाग्रोऽविचिण्—' (7-3-85) इति प्रतिषेधविषयत्वाद् गुणो भवति । एवं सन्नन्ते सर्वत्र बोध्यम् ।

4. अस्य धातोरुदात्तत्वात् 'आर्धधातुकस्येड् वलादेः' (7-2-35) इतीडागमः। एवं तव्यदादिष्वपि ज्ञेयम् ।

5. शतरि, 'अदिप्रभृतिभ्यः शपः' (2-4-72) इति शपो विकरणप्रत्ययस्य लुका अपहारे, शतुः ङित्त्वेन गुणाभावे, 'इको यणचि' (6-1-77) इति यणि, 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुमभावे च रूपम्। 'जक्षित्यादयः षट्' (6-1-6) इत्यभ्यस्तसंज्ञा भवति ।

6. ण्यन्तात्, 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति नित्यं परस्मैपदमेव तेन शानज् न ।

A. 'तं जाग्रतं दीनदरिद्रपोषे चकासतं शाश्वतमप्रशान्तान् ।' धा. का. 25-2.